१४६अ०। "फलान्यादत्स्व चित्राणि परिक्रीडस्व सानुषु" भट्टिः। "मरुतस्तमभितः परिचिक्रीडुः" शत० ब्रा० २,५,२,२०, आर्षस्तङभावः। समस्तु अकूजने अव्यक्तशब्दाभावे एव तङ्। "समोऽकूजने" वार्त्तिककृता नियमात् "हरः संक्रीडमानस्य उमया सह पर्व्वते" रामा० आ० ४७,१०, तेनास्य कूजनार्थताऽपि किन्तु तत्र न तङ् "संक्रीडति चक्रम्" सि०कौ०। "तैस्तैर्विहारैर्बहुभिर्दैत्यानां कामरूपिणाम्। समाः संक्रीडतां तेषाम्" भा० आ० २०६अ०। अत्र आर्षः तङभावः।

**क्रीड** पु० क्रीड—घञ्। परीहासे शब्दरत्ना०। [त्रिका०।

**क्रीडक** न० क्रीड—ण्वुल्। १क्रीडाकारके। २द्वाःस्थे सेवके

**क्रीडचक्र** न० "इदं क्रीडचक्रं सदीर्घं समस्तैर्यकारैः समेतम्" वृ० र० उक्ते छन्दोभेदे।

**क्रीडन** न० क्रीड—भावे—ल्युट्। १खेलायाम् "उदकक्रीडनं नाम कारयामास भारत!" भा० आ० १२८अ०। "बालक्रीडनमिन्दुशेखरधनुर्भङ्गावधि" महाना०। करणे ल्युट्। २क्रीडासाधने। "यथा हिरण्याक्ष उदारविक्रमो महाहवे क्रीडनवन्निराकृतः" भाग० ३,१६,१४, स्वार्थे क। तत्रार्थे "क्रीडसे त्वं नरव्याघ्र! बालः क्रीडनकैरिव" भा० व० १२अ०।

**क्रीडनीय** त्रि० क्रीड—करणे वा० अनीयर् क्रीडनाय साधु छ वा। क्रीडासाधने। "क्रीडतः क्रीडनीयानि ददुः पक्षिगणांश्च ह" भा०अनु०८६अ०।

**क्रीडा** स्त्री क्रीड—भावे अ। १परीहासे २खेलने च "क्रीडारसं निर्विशतीव बाल्ये" कुमा०। "आत्मरतिरात्मक्रीड आत्ममिथुन आत्मानन्दः" छा० उप०। "तोयक्रीडानिरत युवतिस्नानतिक्तैर्मरुद्भिः" मेघ० "क्रीडायासश्रमशमपटवः" माघः। क्रीडागृह, क्रीडाशैल, क्रीडोद्यानादयः क्रीडार्थ गृहादौ। क्रीडासचिव नर्म्मसचिवे

**क्रीडाताल** पु० "एकएव प्लुतोयत्र क्रीडातालः स कथ्यते" इति सङ्गीतदामोदरोक्ते तालभेदे।

**क्रीडानारी** स्त्री क्रीडायाः क्रीडार्थं नारी अश्वघासादिवत् चतुर्थ्यर्थे इत०। क्रीडार्थायां वेश्यारूपायां नार्य्याम्। "वेश्या निवेशिता वीर! द्वारवत्यां सहस्रशः। सामान्यास्ताः कुमाराणां क्रीडानार्य्यो महात्मनाम्" हरि०१४७अ०। [श० चि०

**क्रीडायान** न० क्रीडार्थं यानम् चतुर्थ्यर्थे इत०। पुष्परथे

**क्रीडारत्न** न० क्रीडाया रत्नमिव। रतौ त्रिका०

**क्रीडारथ** पु० क्रीडायाः क्रीडार्थो रथः चतुर्थ्यर्थे इत०। पुष्परथे "क्रीडारथोऽस्तु भगवन्नुत सांग्रामिको रथः" भा० आ० ५३अ०

**क्रीडारसातल** न० श्रीगदितलक्षणयुते उपरूपकभेदे यथा "प्रख्यातवृत्तमेकाङ्कं प्रख्यातोदात्तनायकम्। प्रसिद्धनायकं गर्भविमर्शाभ्यां विवर्ज्जितम्। भारतीवृत्तिबहुलं श्रीतिशब्देन संयुतम्। मतं श्रीगदितं नाम विद्वद्भिरुपरूपकम् यथा क्रीडारसातलम्" सा०द०

**क्रीडि** त्रि० क्रीड—इन्। क्रीडके। "आ क्रीडयो न मातरं तुदन्तः" ऋ० १०।६४।१४।

**क्रीडिन्** त्रि० क्रीड—वा०ताच्छील्ये इनि। १क्रीडाशीले २वायुभेदे पु० "क्रीडिभ्यः संवृष्टान् मरुद्भ्यः" यजु० २४। २६ "क्रीडी च शाकी चोज्जेषी" यजु० १७।८५ "क्रीडी सदाक्रीडाशीलोमरुत्" वेददी०।

**क्रीडु** त्रि० क्रीड उन्। क्रीडाकारके। "क्रीडुर्मखो न मंहयुः पवित्रं सोम! गच्छसि" ऋ० ६।२०।७

**क्रीत** त्रि० क्री—कर्म्मणि क्त। १मूल्यदानेन स्वत्वास्पदीभूते कृते। "शूद्रानीतैः क्रयक्रीतैः (जलैः)कर्म्म कुर्व्वन् पतत्यधः" स्मृतिः। २गौणपुत्रभेदे पु०। "क्रीतस्य नवमः स येन क्रीतः" विष्णुसं०। भावे क्त। ३क्रये न० क्रीतानुशयः। पुत्रभेदास्तल्लक्षणानि च योगीश्वरेण दर्शितानि यथा "औरसो धर्म्मपत्नीजस्तत्समः पुत्रिकासुतः। क्षेत्रजः क्षेत्रजातस्तु सगोत्रेणेतरेण वा। गृहे प्रच्छन्न उत्पन्नो गूढजस्तु सुतः स्मृतः। कानीनः कन्यकाजातो मातामहसुतोमतः। अक्षतायां क्षतायां वा जातः पौनर्भवः सुतः। दद्यान्माता पिता वा यं स पुत्रोदत्तको भवेत्। क्रीतश्च ताभ्यां विक्रीतः, कृत्रिमः स्यात् स्वयंकृतः। दत्तात्मा तु स्वयन्दत्तो गर्भे विन्नः सहोढजः। उत्सृष्टो गृह्यते यस्तु सोऽपविद्धोभवेत् सुतः"। "अदूर० बान्धवमिति देशभाषाविप्रकृष्टस्य प्रतिषेधः एवं क्रीतस्वयन्दत्तकृत्रिमेष्वपि योज्यं समानन्यायत्वात्। क्रीतस्तु विक्रीतः मातापितृभ्यां पूर्व्ववत् तथैकं पुत्रं ज्येष्ठञ्च वर्जयित्वा आपदि। सवर्ण इत्येव यत्तु मनुनोक्तम् "क्रीणीयाद्यस्त्वपत्यार्थं मातापित्रोर्यमन्तिकात्। स क्रीतकः सुतस्तस्य सदृशोऽसदृशोपिऽर्वेति" तद्गुणैः सदृशोऽसदृशो वेति व्याख्येयं न जात्या "सजातीयेष्वयम्प्रोक्तस्तनयेषु मया विधिः" इत्युप संहारात्" मिता०। स्वार्थे क। तत्रार्थे। "कानीनश्च सहोढश्च क्रीतः पौनर्भवस्तथा।